**ಕರ್ನಾಟಕ ಪ್ರೌಢಶಿಕ್ಷಣ ಪರೀಕ್ಷಾ ಮಂಡಳಿ**
ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು–560003.

**KARNATAKA SECONDARY EDUCATION EXAMINATION BOARD**
Malleshwaram, Bengaluru – 560003.

**2020-21 ಸಾಲಿನ ಮಾದರಿ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆ –2**
**2020-21 MODEL QUESTION PAPER - 2**

| | |
|---|---|
| **ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ – ಸಂಸ್ಕೃತ** | **ವಿಷಯ ಸಂಕೇತ : 67-S** |
| **Subject : THIRD LANGUAGE SANSKRIT** | **Subject Code : 67-S** |
| **ಅವಧಿ : 3 ಗಂಟೆ** | **ಗರಿಷ್ಠ ಅಂಕಗಳು : 80** |
| **Time : 3 hrs.** | **Max. Marks : 80** |

**ಶಾಲಾ ಅಭ್ಯರ್ಥಿಗಳಿಗೆ**
**Regular Fresh**

---

## परीक्षार्थिनां सामान्यसूचना:

1) अस्मिन् प्रश्नपत्रे अष्ठत्रिंशत् (38) वस्तुनिष्ठा: विषयनिष्ठाश्च प्रश्ना: सन्ति।

2) इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति। परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत। प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति पर्यालोचयत।

3) वस्तुनिष्ठनां विषयनिष्ठानां च प्रश्नानां विषये निर्दिष्टा: नियमा: अनुपालनीया:।

4) प्रश्नानां प्रति अधिकृता: अङ्का: पार्श्वे लिखिता: सन्ति।

5) प्रश्नपत्रमुत्तरयितुं निर्धारित: समयावधि: प्रश्नपत्रस्य उपरि भागे लिखित: अस्ति। पञ्चदशनिमेषा: प्रश्न पत्रस्य पठनार्थं निर्धारिता: सन्ति।

**I. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः। तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत –** $8 \times 1 = 8$

1. 'जनकः' – अस्य समानार्थकं पदम् इदं भवति।
   A. माता
   B. पिता
   C. पुत्रः
   D. गुरुः

2. 'तमः' – अस्य विरुद्धार्थकं पदम् इदं भवति।
   A. जनः
   B. घनः
   C. धनम्
   D. प्रकाशः

3. 'प्रश्नान्' अत्र एषा विभक्तिः अस्ति।
   A. द्वितीयाविभक्तिः
   B. तृतीयाविभक्तिः
   C. चतुर्थीविभक्तिः
   D. पञ्चमीविभक्तिः

4. 'गच्छ' अत्र एषः लकारः अस्ति।
   A. लुट्
   B. लृट्
   C. लोट्
   D. लङ्

5. 'प्रयच्छति' – अत्र एषः पुरुषः अस्ति।
   A. प्रथमपुरुषः
   B. मध्यमपुरुषः
   C. उत्तमपुरुषः
   D. अन्यपुरुषः

6. देवी विराजमाना अस्ति। अत्र रेखाङ्कितपदे एषः प्रत्ययः भवति।

A. तुमुन्प्रत्ययः

B. शानच्प्रत्ययः

C. क्त्वाप्रत्ययः

D. क्तवतुप्रत्ययः

7. 'निर्विघ्नम्' – अत्र एषः समासः भवति।

A. तत्पुरुषसमासः

B. द्वन्द्वसमासः

C. अव्ययीभावसमासः

D. बहुव्रीहिसमासः

8. अत्र समूहेतरपदम् इदं भवति।

A. गच्छन्

B. हसन्

C. पठन्

D. ज्ञातुम्

## II. चतुर्थपदं लिखत – 4 x 1 = 4

9. वेदव्यासः – महाभारतम् : : भासः – ......................

10. हिमघ्नः – सूर्यः : : खण्डेन्दुकृतशेखरः – ...................

11. महत्तरा – भिक्षा : : देहरक्षा – ...................

12. पार्थः – अर्जुनः : : गीताचार्यः – ...................

## III. एकवाक्येन उत्तरं लिखत – 4 x 1 = 4

13. पठनार्थं का आवश्यकी ?

14. विप्ररूपेण कः प्रविशति ?

15. सर्वदा अस्माकं वदने का वसेत्?

16. कः ज्ञानं लभते?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत –** **4 x 2 = 8**

17. पुस्तकमेलायाः वेदिकायां के कार्यक्रमाः अभवन्?

18. एकाग्रतायाः विषये विवेकानन्दः किम् अवदत्?

19. कालपर्ययात् का क्षयं गच्छति? किं किं तथैव तिष्ठति?

20. खलसज्जनानां मैत्री कीदृशी भवति इति वर्णयत।

अथवा

पञ्च अचोरहरणीयानि कानि?

**V. संस्कृतभाषया अनुवादं कुरुत –** **1 x 2 = 2**

21. ಮಹಾಭಾರತದ ಭೀಷ್ಮಪರ್ವದಲ್ಲಿ ಭಗವದ್ಗೀತೆ ಇದೆ. ಇದನ್ನು ಶ್ರೀಕೃಷ್ಣನು ಅರ್ಜುನನಿಗೆ ಉಪದೇಶಿಸಿದನು.

Bhagavadgita is in Bhismaparva of Mahabharat. Lord Shree Krishna preached Gita to Arjuna.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत।** **1 x 2 = 2**

22. पुरा भोजभूपालस्य सभायाम् अनेके कवयः आसन्। तेषामेकः कालिदासः नाम।

**VII. विग्रहवाक्यं लिखत।** **1 x 2 = 2**

23. i. महाबलः।

ii. प्रतिक्षणम्।

अथवा

समस्तं पदं लिखत।

i. प्राप्तः आनन्दः यस्य सः =

ii. वृक्षस्य समीपम् =

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत।** **1 x 2 = 2**

24. ''करारविन्देन पदारविन्दम्।''

**IX. यथा निर्देशम् उत्तरं लिखत।** **2 x 3 = 6**

25. ''मया एतानि सर्वाणि पुस्तकानि पठितानि।''
क: पाठ: ? क: अवदत्? कम् अवदत्।

26. 'सागर इव तिष्ठतु ते यश:'
क: पाठ: ? क: अवदत्? कम् अवदत्?

**X. सन्धिं विभज्य नाम लिखत।** **1 x 3 = 3**

27. a. ज्योतिर्गमय
b. लोकार्पणम्
c. नमोऽस्तु

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दो नाम लिखत –** **1 x 3 = 3**

28. आरम्भगुर्वी क्षयिणी क्रमेण।

**XII. कवे: देश–काल–कृतीनां विषये चतुरै: वाक्यै: उत्तरं लिखत –** **1 x 3 = 3**

29. डा. बा. श्री रामकृष्णराव्

अथवा

भास:

**XIII. पद्यपाठस्य नाम विलिख्य तात्पर्यं पञ्चषै: वाक्यै: कर्नाटकभाषया, संस्कृतभाषया, आङ्गलभाषया वा लिखत।** **3 x 3 = 9**

30. कर्मण्ये वाधिकारस्ते मा फलेषु कदाचन।
मा कर्म फलहेतुर्भू: मा ते सङ्गोऽस्त्वकर्मणि।।

31. अशनं भिन्नं वसनं भिन्नम्
रूपं भिन्नं रीतिरपि।
भिन्नं भाग्यं भिन्नो वर्ण:
भिन्नं सर्वं भेददृशे।।

32. शिक्षा क्षयं गच्छति कालपर्ययात्
सुबद्धमूलाः निपतन्ति पादपाः।
जलं जलस्थानगतं च शुष्यति
हतुं च दत्तं च तथैव तिष्ठति।।

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत।** **1 x 3 = 3**

33. गुरुवे ........................................................

.......................................दक्षिणामूर्तये नमः।।

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया, आङ्गलभाषया, संस्कृतभाषया वा लिखत।** **2 x 4 = 8**

34. विश्वसंस्कृतपुस्तकमेलायाः वैभवं वर्णयत।

35. विक्रमः वेतालश्च इति कथायाः सारांशं सङ्गृह्य लिखत।

अथवा

'उभयभारती' भारतस्य आदर्शनारी इति विषयं सङ्गृह्य लिखत।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत।** **1 x 4 = 4**

36. भारते अनेकानि पुण्यक्षेत्राणि सन्ति। दक्षिणभारते कन्याकुमारी दर्शनीया अस्ति। प्रकृति-धर्म-संस्कृतिभिरपि एषा प्रसिद्धा। भारतस्य दक्षिणे भूशिरसि समुद्रतीरे कन्याकुमारी यात्रा स्थलं वर्तते। कन्याकुमारी श्रद्धालूनां पुण्यक्षेत्रम् अस्ति। कन्याकुमारी पश्चिमाद्रिभागस्य दक्षिणे भागे वर्तते। प्रवासिभिः अत्रैव स्थित्वा सूर्योदयस्य सूर्यास्तस्यापि रमणीयतां दृष्टुं शक्यते। सागरतटेषु सिकताराशयः मुक्तामणयः इव चकासन्ते। धृतदेहा प्रकृतिमाता इव कन्याकुमारी सदा सुशोभिता वर्तते।

i. दक्षिणभारते का दर्शनीया अस्ति?

ii. कन्याकुमारी केषां पुण्यक्षेत्रम् अस्ति?

iii. कन्याकुमारी यात्रास्थलं कुत्र वर्तते?

iv. सागरतटेषु सिकताराशयः किमिव चकासन्ते?

**XVII. दशवाक्यैः प्रबन्धं लिखत।** **1 x 4 = 4**

37. "परिसरमालिन्यम्"

अथवा

" कनार्टकराज्योत्सव:"

**XVIII. पत्रं लिखत।** **1 x 5 = 5**

38. उडुपिमण्डलस्य सर्वकारीयविद्यालयस्य छात्र:/छात्रा इति मत्वा अग्रजस्य विवाहार्थं दिनचतुष्टयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत।

अथवा

प्रवासार्थ धनं प्रेषयितुं पितरं प्रति पत्रं लिखत।